पलं, क्ली, (पलतीति । पल+अच् ।) आमिषम् । कर्षचतुष्टयम् । इत्यमरः ।३।३।२०१॥२।६।८६ ॥ तत्तु शास्त्रे तोलकचतुष्टयम् । वैद्यके अष्टतोलकम् । लौकिके साष्टरक्तिद्विमाषकतोलकत्रितयम् । तत्पर्य्यायः । मुष्टिः २ प्रकुञ्चः ३ चतुर्थिका ४ विल्वम् ५ षोड़शिकाम्रम् ६ । इति वैद्यकपरिभाषा ॥ यथा, तिथ्यादितत्त्वे ।
"पलन्तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम् ।
तोलकत्रितयं ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतम् ॥"
विघटिका । इति राजनिर्घण्टः ॥ सा तु घटिकाषष्टिभागैकभागः । षष्टिविपलञ्च । पलदण्डयोः प्रमाणन्तु ।
"दशगुर्व्वक्षरोच्चारकालः प्राणः षड़ात्मकैः ।
तैः पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते ॥"
तेन च ।
"सा कान्ते पचस्यान्ते पर्य्यांकाशे देशे स्वाशीः
कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत् ।
क्षुत्क्षामः शाटं चेतश्चेतो राहुः क्रूरः प्राद्यात्तस्माद्धान्ते हर्म्म्यस्यान्ते शय्येरकान्ते कर्त्तव्या ॥"
अस्यैकपाठात् पलं षष्ठिपाठाद्दण्डः । इति ज्योतिस्तत्त्वम् ॥

पलः, पुं, (पलतीति । पल्+अच् ।) पलालः । इति हेमचन्द्रः । ४ । २४८ ॥ (यथा, महाभारते । ३ । २३३ । ११ ।
"चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्च पलाश्च वर्ज्ज्याः ॥")

पलक्या, स्त्री, (पलकं मांसं तद्वृद्धये हितम् । पलक+यत् । स्त्रियां टाप् ।) पालङ्कशाकः । इति राजनिर्घण्टः ॥

पलगण्डः, पुं, (पलं मांसं तद्वत् गण्डति भित्तौ मृदादिना लिम्पतीति । गण्ड+अच् ।) लेपकः । इत्यमरः । २ । १० । ६ ॥ राज इति भाषा ॥

पलङ्कटः, त्रि, (पलं मांसं कटति आकुञ्चितं करोतीति । पल+कट+बाहुलकात् खच् मुम् च ।) भयशीलः । भीरुः । इति त्रिकाण्डशेषः ॥

पलङ्करः, पुं, (पलं मांसं करोतीति । पल+कृ+अच् । "तत्पुरुषे कृतीति ।" ६।३।१४ । इति द्वितीयायाः अलुक् ।) पित्तम् । इति त्रिकाण्डशेषः ॥

पलङ्कषः, पुं, (पलं कषतीति । कष हिंसायाम्+अच् । "तत्पुरुषे कृतीति ।" ६ । ३ । १४ । इति द्वितीयाया अलुक् ।) राक्षसः । इति मेदिनी । षे, ५३ ॥ कणगुग्गुलुः । इति राजनिर्घण्टः ॥

पलङ्कषा, स्त्री, (पलङ्कष+टाप् ।) गोक्षुरकः । रास्ना । गुग्गुलुः । किंशुकः । मुण्डीरी । लाक्षा । इति मेदिनी ॥ क्षुद्रगोक्षुरकः । महाश्रावणी । (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"अजाचोक्षर्म्मरोमाणि वचाकुष्ठ पलङ्कषा ॥")
मक्षिका । इति राजनिर्घण्टः ॥

पलप्रियः, पुं, (पलमामिषं प्रियं यस्य ।) द्रोणकाकः । इति राजनिर्घण्टः ॥ मांसाशिनि, त्रि ॥

पलभा, स्त्री, (पलस्य भा छविर्यत्र ।) मेषसंक्रमणादर्व्वाक् सपादाष्टदिने मध्याह्ने द्वादशाङ्गुलशङ्कुजा छाया । तत्पर्य्यायः । पलविभा २ विषुवत्प्रभा ३ । यथा, ग्रहलाघवे ।
"मेषादिगे सायनभागसूर्य्ये
दिनार्द्धजा भा पलभा भवेत् सा ॥"
पलभयोद्धृतचरखण्डकैः क्रमोत्क्रमस्थैर्हीनान्वितैर्लङ्कोदयैः स्वदेशीयोदया भवन्ति । अन्यत्स्पष्टाधिकारेऽपि चरसंस्कृता ग्रहाः स्पष्टा भवन्तीति प्रयोजनम् ॥ यथा, सिद्धान्तशिरोमणौ ॥
"क्रियतुलाधरसंक्रमपूर्व्वतोऽयनलवोत्थदिनै विषुवद्दिनम् ।
मकरकर्कटसंक्रमतोऽयनं द्युदलभा विषुवद्दिवसेऽक्षभा ॥"
"एवं विषुवती छाया स्वदेशे या दिनार्द्धजा ।
दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा ॥"
इति सूर्य्यसिद्धान्तः ॥
"अजतुलादिगतस्य रवेर्द्दिने
द्युदलभार्कमिताङ्गुलशङ्कुजा ।
पलविभाथ— ॥"
इति वृद्धवशिष्ठसिद्धान्तः ॥

पललं, क्ली, (पलति गच्छतेऽनेन वा । पल गतौ +"वृषादिभ्यश्चित् ।" उणां १ । १०८ । इति कलच् ।) मांसम् । इत्यमरः ।२।६।६३ ॥ (यथा, गारुड़े । १८१ अध्याये ।
"मार्ज्जारपललं विष्ठा हरितालञ्च भावितम् ।
छागमूत्रेण तल्लिप्तो मूषिको मूषिकान् हरेत् ॥")
पङ्कम् । (यथा, गोः रामायणे ।५।८७।२६ ।
"दोषपङ्कनिमग्नं त्वामयशःपललावृतम् ।
सर्व्वथा मानुषो रामस्त्वामन्तमुपनेष्यति ॥")
तिलचूर्णम् । इति मेदिनी । ले, १०४ ।
"पललं तिलकल्कं स्यात्तिलचूर्णञ्च पिष्टकः ।
पललं मधुरं रुच्यं पित्तास्रबलपुष्टिदम् ॥"
इति राजनिर्घण्टः ॥
सैन्धवतिलचूर्णम् । तिलकुटा इति भाषा । यथा, वैद्यके ।
"पललन्तु समाख्यातं सैन्धवं तिलपिष्टकम् ।
पललं मलकृद्वृष्यं वातघ्नं कफपित्तकृत् ॥
बृंहणं गुरु वृष्यञ्च स्निग्धं मूत्रनिवर्त्तकम् ॥"

पललः, पुं, (पलतीति । पल गतौ+"वृषादिभ्यश्चित् ।" उणां । १ । १०८ । इति कलच् । यद्वा, पलं मांसं लातीति । ला+कः ।) राक्षसः । इति मेदिनी । ले, १०४ ॥

पललज्वरः, पुं, (पललस्य मांसस्य ज्वर इव ।) पित्तम् । इति हारावली । १४१ ॥

पललाशयः, पुं, (पलले आशेते इति । आ+शीङ शयने+अच् ।) गण्डरोगः । इति शब्दरत्नावली ।

पलवः, पुं, (पलं पलायनं वाति हिनस्ति नाशयतीति । पल+वा ल गमनहिंसयोः+"आतोऽनुपसर्गे कः ।" ३।२।३ । इति कः ।) मत्स्यधारणोपायः । पोलो इति भाषा । तत्पर्य्यायः । प्लवः २ पञ्जराखेटः ३ । इति त्रिकाण्डशेषः ॥

पलाग्निः, पुं, (पलस्य मांसस्य अग्निः । मांसपाकशक्तिमत्तयास्य तथात्वम् ।) पित्तम् । इति हारावली । १४१ ॥

पलाङ्गः, पुं, (पलं मांसं तत्प्रधानं अङ्गं यस्य ।) शिशुमारः । इति हारावली । ७७ ॥

पलाण्डुः, पुं, (पलस्य मांसस्य अण्डमिवाचरतीति । "मृगय्वादयश्च ।" उणां १।३८ । इति कुप्रत्ययात् साधुः ।) मूलविशेषः । पेयाज् इति भाषा । तत्पर्य्यायः । सुकन्दकः २ । इत्यमरः ।२।४।१४७ ॥ लोहितकन्दः ३ । इति रत्नमाला ॥ तीक्ष्णकन्दः ४ उष्णः ५ मुखदूषणः ६ शूद्रप्रियः ७ कृमिघ्नः ८ दीपनः ९ मुखगन्धकः १० बहुपत्रः ११ विश्वगन्धः १२ रोचनः १३ पलाण्डूः १४ सुकुन्दकः १५ । इति शब्दरत्नावली ॥ अस्य गुणाः । कटुत्वम् । बल्यत्वम् । कफपित्तवान्तिदोषनाशित्वम् । गुरुत्वम् । वृष्यत्वम् । रोचनत्वम् । स्निग्धत्वञ्च । इति राजनिर्घण्टः ॥ यथा, भावप्रकाशे ।
"पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः ।
पलाण्डुस्तु गुणैर्ज्ञेयो रसोनसदृशो गुणैः ॥
स्वादुपाकरसोऽनुष्णः कफकृन्नातिपित्तलः ।
हरते केवलं वातं बलवीर्य्यकरो गुरुः ॥"
पलाण्डुभक्षणे दोषो यथा,—
"पलाण्डुं विड्वराहञ्च छत्राकं ग्रामकुक्कुटम् ।
लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत् ॥"
इति प्रायश्चित्तविवेके याज्ञवल्क्यः ॥

पलादः, पुं स्त्री, (पलं मांसमत्तीति । अद भक्षणे+"कर्म्मण्यण् ।" ३ । २ । १ इत्यण् ।) राक्षसः । इति जटाधरः ॥ (मांसभक्षके, त्रि ॥)

पलादनः, पुं स्त्री, (पलं मांसमत्तीति । पल+अद+ल्युः ।) राक्षसः । इति हेमचन्द्रः ॥ मांसभक्षणशीले, त्रि ॥

पलान्नं, क्ली, (पलं मांसं तेन सह पक्वं अन्नम् । शाकपार्थिवादिवत् समासः ।) मांसादियुक्तसिद्धभक्तम् । पोलाओ इति भाषा । तस्य पाकप्रकारो द्रव्याणि च यथा । छागमांसं १ शरावः । घृतं ।० शरावपादः । त्वचं ३ माषकम् । लवङ्गं ३ माषकम् । एला ३ माषकम् । तण्डुलं १ शरावः । मरिचं २ तोलकम् । तेजपत्रं २ तोलकम् । कुङ्कुमं १ माषकम् । आर्द्रकं २ तोलकम् । लवणं ६ तोलकम् । धन्याकं २ तोलकम् । द्राक्षा ⁄० शरावपादार्द्धम् । छागमांसं सूक्ष्मं धौतयित्वा शुष्कप्रलेहपाककरणानन्तरं पात्रान्तरे तेजपत्रोपरि अल्पाखण्डगन्धद्रव्येण सह प्रथमं सज्जीकर्त्तव्यम् । ततस्तण्डुलं जलेनार्द्धसिद्धं कृत्वा मण्डगालनपूर्व्वकमल्पाखण्डगन्धद्रव्येण सह तन्मांसोपरि सज्जीकर्त्तव्यम् । एवं प्रकारेण वारं वारं सज्जीकृत्य तदुपरि अवशिष्टघृत-